चायं सोमधर्मः, किं तर्हि तदतिपवने यागान्तरविधानमिति। अग्निचितस्तु वर्षत्रयस्यापि भवति अग्निसंयोगविधानात्। अग्निचितः तथा सोमयाजिनः तथा सोमातिपूतस्य तथा सोमवामिनः मुखव्यतिरिक्तेभ्यो नासिकाकर्णगुदादिच्छिद्रेभ्यः यस्य सोमः स्रवति स सोमातिपूत इत्युच्यते मुखेन यः सोमं वमति स सोमवामी" सं०व्या०। "राज्ञोऽपरुद्धस्य च सौत्रामणी भवति" सू०। "दुष्टरीतुं पौंसायनो रुद्ध आसेति" तद्विधानात्। स्वराज्यात् प्राच्यावितस्य राज्ञः स्वराज्यप्राप्त्यर्थम्" कर्कः। "अलब्धपशोरपशोः" सू०। "सौत्रामणी भवति पशुयोग्यः सन् यो नाम पशून्न विन्दते सोऽलब्धपशुरपशुः" कर्कः।

तत्र सुरापच्यवनप्रकारः तत्रैवोक्तः

"दक्षिणेन हृत्वा नग्नहुचूर्णानि कृत्वा तांश्च व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य चूर्णैः संसृज्य निदधाति तन्मासरम्" सू०। "दक्षिणेन द्वारेण प्रवेश्याग्न्यगारम् नग्नहुचूर्णादि कृत्वा नग्नहुः किण्व उच्यते तांश्च शष्पादींश्चूर्णयित्वा व्रीहिश्यामाकौदनयोः पृथगाचामौ विनिषिच्य चूर्णैः संसृज्य निदधाति तन्मासरमुच्यते व्रीहिश्यामाकाभ्यां च सुरा निष्पाद्यते सा च यागसाधनम्। तेन सा तद्धर्मैरभिसम्बध्यते अतस्तयोश्चतुर्मुष्टिकग्रहणपूर्वकम् पृथगोदनौ निष्पाद्येते" कर्कः। "नग्नहुचूर्णानि कृत्वा नग्नहुशब्दार्थमाह "सर्ज्जत्वक् त्रिफला चैव शुण्ठी चैव पुनर्नवा। चतुर्जातकसंयुक्ता पिप्पली गजपिप्पली। वंशोऽवका हट्टकला चित्रकं चेन्द्रवारुणी। अश्वगन्धां समुत्पाद्य मूलान्येतानि निर्दिशेत्। धान्यकं च यवानी च जीरकं कृष्णजीरकम्। द्वे हरिद्रे वचा चैव विरूढा व्रीहयो यवाः" इति। क्रयणानन्तरं तानि शष्पादीन्यादाय दक्षिणेन हृत्वाऽग्न्यगारं प्रवेश्य पूर्वं नग्नहुचूर्णानि कृत्वा सर्ज्जत्वगाद्यौषधानि तूष्णीं पिष्ट्वा तान् शष्पतोक्मलाजान् चूर्णीकृत्य दर्शपूर्णमासधर्मेण पात्रासादनादि श्यामाकचतुर्मुष्टिकग्रहणपूर्वकं फलीकरणान्तं समन्त्रकं कृत्वा बहुतरोदके पृथक् पृथक् चरू पक्त्वा शृतालम्भनानन्तरं व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य पृथग्भिन्नयोः पात्रयोश्चरोर्मध्यादतिरिक्तमुष्णोदकमवस्राव्य तदुदकं नग्नहुप्रभृतिभिश्चतुर्भिश्चूर्णैः संसृज्य निदधाति स्थापयति तन्मासरम्। तस्य चूर्णसंसृष्टस्याचामस्य मासरमिति संज्ञा" सं०व्या०। "ओदनौ चूर्णमासरैः संसृज्य स्वाद्वीं त्वांशुना ते" इति त्रिरात्रं निदधाति" सू०। "चूर्णमासरसंसृष्टावोदनौ "स्वाद्वीं त्वेति" "अंशुना ते इति" मन्त्राभ्यां कुम्भ्यां प्रक्षिपति स्थित्वा च त्रिरात्रं निधेया सुरा" कर्कः। "एवमाचामयोश्चूर्णसंसर्गानन्तरमोदनौ चतुर्भिश्चूर्णैः संसृज्य स्वाद्वीं त्वा स्वादुनेति यजु० १९।१ "अंशुना ते यजु०" २०।२७ द्वाभ्यां मन्त्राभ्यामेकस्मिन् महति पात्रे चूर्णसंसृष्टावोदनौ मासराभ्यां च संसृज्य त्रिरात्रं निदधाति सुगुप्ते देशे स्थापयति शालाया नैर्ऋतकोणे गर्तं कृत्वा तत्र स्थापयतीति जीर्णः सम्प्रदायः" तिस्रो रात्रीरित्यादिश्रुतेः "एकस्याः पयसा पाकृतेनाश्विनेन परिषिञ्चति परीतो षिञ्चतेति" सू०। सुरां परिषिञ्चति "एकस्यै० परिषिञ्चतीति" वचनात्। अश्विनावुद्दिश्योपाकरणं कर्त्तव्यम् तच्चापूर्वत्वादप्रधानत्वाच्च पयसः अश्विभ्यामुपाकरोमीति गोस्पर्शनमात्रमेवेति सम्प्रदायः। अपरे तु धर्मवदुपाकरणमिच्छन्ति" कर्कः "शष्पचूर्णानि चावपति" सू० "चशब्दात् सुरायाम्" कर्कः। "सारस्वतेन द्वयोः प्रातः" सू०। "प्रातःशब्देन च द्वितीयमहरभिधीयते तत्रापि च रात्रावेवाभिषेकः प्रथमां रात्रिं परिषिञ्चतीति प्रकृत्य "द्वयोर्दुग्धेन द्वितीयामित्याह द्वितीयाम् रात्रिमिति गम्यते" कर्कः। "प्रातःशब्देन श्वोऽभिधीयते" सं०व्या० "तोक्मचूर्णानि च" सू०। 'आवपति' ऐन्द्रेणोत्तमे तिसृणाम्" सू० "गवां दुग्धेनैन्द्रेण परिषिञ्चति" कर्कः उत्तमे तृतीयेऽहनि सं०व्या०। "लाजचूर्णानि च" सू० "आवपति अत्र चूर्णानां पयसश्च संस्कारकत्वम् साधनं तु व्रीहिश्यामाकावेव अतस्तयोरेव देवतोद्देशेन ग्रहणम्" कर्कः। यजु० १९अ० वेददीपे तु तदङ्गसुराच्यवनप्रकारः स्पष्टः दर्शितो यथा "अथ सौत्रामणीमन्त्रास्त्रिभिरध्यायैः। ऋद्धिकामस्याग्निचितो मुखेतरच्छिद्रसोमवामिनो मुखेन सोमवामिनो राज्यच्युतस्यापशुकामस्य च सौत्रामणीयागः। अन्तःपात्यस्थाने गोचर्माणि एतानि स्थापयेत् सोमं सुराविक्रयिणः क्रीयाद्वा क्रीत्वा सीसेन शष्पं क्रीत्वा ऊर्णाभिस्तोक्मान् सूत्रेण लाजान् केनचिद्द्रव्येण नग्नहुम् विरूढा व्रीहयः शष्पम् विरूढा यवास्तोक्माः भृष्टव्रीहयो लाजाः सर्जत्वक्त्रिफलाशुण्ठीपुनर्नवाचतुर्जातकपिप्पलीगजवंशावकाहट्टकलाचित्रकेन्द्रवारुण्यश्वगन्धाधान्यकयवानीजीरकद्वयहरिद्राद्वयविरूढयवव्रीहय एकीकृता नग्नहुः। शष्पतोक्मलाजनग्नहून् दक्षिणद्वारेणाग्निगृहं नीत्वा संचूर्ण्य